National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2025; 1(61): 105-107
© 2025 NJHSR
www.sanskritarticle.com

**नारायणशर्मा**
शोधच्छात्रः, (न्यायविभागः),
श्रीलालबहादुरशस्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

**Correspondence:**
**नारायणशर्मा**
शोधच्छात्रः, (न्यायविभागः),
श्रीलालबहादुरशस्त्रीराष्ट्रियसंस्कृत-
विश्वविद्यालयः, नई दिल्ली

# न्यायनये प्रमेयतत्त्वस्वरूपविचारः

**नारायणशर्मा**

**सारसंक्षेपः**

*वयं सर्वे संस्कृतानुरागिणः ज्ञातवन्तः समेषामपि विद्यास्थानानां मूलस्तम्भत्वेन आन्वीक्षिकीविद्यायाः वेदप्रामाण्यहेतुत्वात् प्रसिद्धिः राराजन्ते। वेदे प्रमाणतया व्यपस्थापिते किल वेदवाक्यानामर्थ-विचाररूपमीमांसादिविद्यास्थानानां याथार्थ्यम्। न्यायशास्त्रं मुख्यतया* ***'मानाधीना मेयसिद्धिः'*** *इति न्यायमनुसृत्य प्रमाणस्योल्लेखः षोडशपदार्थल्लेखमध्ये आदौ संस्थापितः। तदनन्तरं निःश्रेयसप्राप्त्यर्थं प्रमेयस्याभिधानं विद्यते। अत्र न्यायदर्शने प्रमाणविषयीभूतं सर्वमपि प्रमेयतया नैवाभिहितमपितु साक्षादपवर्गोपयोगिज्ञानविषयत्वेन मोक्षार्थिभिः प्रकर्षेण मेयमेव। यद्विषयकं मिथ्याज्ञानं संसारमातनोति, यद्विषयश्च तत्त्वज्ञानं तं निवर्तयति तदेव प्रमेयमिति। तच्च आत्मा, शरीरम्, इन्द्रियम्, अर्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गः इति द्वादशविधम्। अतः प्रमेयविषयकतत्त्वस्य याथार्थता प्रतिपादनार्थं अपि च प्रमेयविषयकविद्यायाः विकसनार्थं न्यायाचार्याणां मतेन सह मन्मतमपि समुपस्थापितम्। अस्मिन्नेव शोधप्रबन्धे न्यायाभिमतद्वादशप्रमेयपदार्थविषयकचर्चा विस्तरेण स्वमत्याधारेण प्रतिपादिता।*

**कुञ्जिकाशब्दाः –**

**प्रमा** - सम्यगनुभवः प्रमा। **प्रमाणम् -** प्रमा करणं प्रमाणम्। **प्रमाता** - प्रमाश्रयः प्रमाता। **प्रमेयम्** - प्रमा विषयः प्रमेयम्। **दुःखम् –** आत्मपवर्गान्यत्वे सति दुःखविषयबुद्धिविषयप्रमेयत्वमेव दुःखम्। **मोक्षः –** समानाधिकरणदुःखासमानकालो दुःखध्वंसा मोक्षः।

समेषां दार्शनिकानां मुख्यं लक्ष्यं भवति मोक्षः। मोक्षसाधनविषये दार्शनिकानां वैमत्यसद्भावेऽपि लक्ष्ये किमपि वैमत्यं नावलोक्यते। स च मोक्षः तत्त्वज्ञानेनैव सम्भवति। अत एव श्रुतिः निगदति– **'ऋते ज्ञानान्न मुक्तिः', 'विद्ययाऽमृतमश्नुते', 'विद्यया विन्दतेऽमृतम्'** इत्यादि। न्यायनये तत्त्वं प्रमाणप्रमेयादि-भेदात् षोडशप्रकारकं भवति। तथा च सूत्रम्- **'प्रमाणप्रमेयसंशयप्रयोजनदृष्टान्तसिद्धान्तावयवतर्क-निर्णयवादजल्पवितण्डा-हेत्वाभासच्छलजातिनिग्रहस्थानानां तत्त्वज्ञानान्निःश्रेयसाधिगमः'**इति।[1] षोडश-विधतत्त्वेषु द्वितीयं तत्त्वं भवति प्रमेयम्। तस्य प्रमेयस्य स्वरूपमत्र समुपस्थाप्यते।

तत्र **'मानाधीना मेयसिद्धिः'** इति न्यायमनुसृत्य आदौ प्रमाणस्योल्लेखः कृतः। तदनन्तरं प्रमेयस्याभिधानं विद्यते। तत्र प्रथमाध्यायस्य प्रथमाह्निके प्रमेयाणां स्वरूपं तृतीयाध्यामारभ्य चतुर्थाध्यायं यावत् आत्मादिप्रमेयस्य परीक्षा च विद्यते। अत्र न्यायदर्शने प्रमाणविषयीभूतं सर्वमपि प्रमेयतया नैवाभिहितमपितु साक्षादपवर्गोपयोगिज्ञानविषयत्वेन मोक्षार्थिभिः प्रकर्षेण मेयमेव। यद्विषयकं मिथ्याज्ञानं संसारमातनोति, यद्विषयं च तत्त्वज्ञानं तं निवर्तयति तत् प्रमेयमिति। प्रमेय इति शब्देन ज्ञेयः मेयो वार्थः लभ्यते अस्माभिः। तत्र द्वादशसंख्यकानि प्रमेयाणि सन्ति। प्रमाणद्वारा यस्य सिद्धिर्जायते तत्प्रमेयम्, अत एव महर्षिणा गौतमेनोक्तं प्रमाणमपि प्रमेयम्– **"प्रमेयता च तुलाप्रामाण्यवत्"**[2]। न्यायमते अपरिसंख्येयाः प्रमेयाः सन्ति। अत एव नैयायिकानां कृते **"अनियत प्रमेयवादी"** इति व्यवहारो प्रसिद्धः।

तच्च प्रमेयम् आत्मा, शरीरम्, इन्द्रियम्, इन्द्रियार्थः, बुद्धिः, मनः, प्रवृत्तिः, दोषः, प्रेत्यभावः, फलम्, दुःखम्, अपवर्गः इति द्वादशविधम्। तथा च सूत्रम् -

**"आत्मशरीरेन्द्रियार्थबुद्धिमनः प्रवृत्तिदोषप्रेत्यभावफलदुः खापवर्गास्तु प्रमेयम्"**[3]।

**'प्रमेयसिद्धिः प्रमाणाद्धि'**[4] प्रमेयसिद्धौ प्रमाणानि सहायकानि भवन्ति। अपवर्गसाक्षात् कारणतत्त्वधीविषयतावच्छेदकरूपवत्त्वम् प्रमेयम्। प्रमेयतत्त्वञ्चात्मशरीरेन्द्रियादिभेदाद् द्वादशविधम्।

वस्तुतः प्रमेयविषये सूत्रकारैः प्रथमाध्यायस्य प्रथमाह्निके उक्तं यत् - **"आत्मशरीरेन्द्रियार्थबुद्धिमनःप्रवृत्तिदोषप्रेत्यभावफलदुःखापवर्गास्तु प्रमेयम्"** सूत्रस्यास्य व्याख्यानावसरे द्वितीयवाचस्पतिमिश्रैः प्रोक्तम् - **"अन्यतमाज्ञानेऽपि नापवर्गतेति दर्शयितुमुद्देशविभाजकपदयोर्वचन-भेदः। तथा च संसारकारणीभूतरागजनकमिथ्याज्ञान- विषयत्वं सामान्यलक्षणम्"**। अन्यैराचार्यैरपि प्रमेयविषये उक्तं यथा – भासर्वज्ञः न्यायसारे – **सम्यगनुभवः प्रमा। प्रमा करणं प्रमाणम्। प्रमाश्रयः प्रमाता। प्रमा विषयः प्रमेयमिति। लक्षणञ्चयद्विषयज्ञानमन्यज्ञाना-नामुपयोगित्वेनैव निःश्रेयससाधनं भवति तत्प्रमेयम्।** तर्कसंग्रहेऽन्नं-भट्टेनोक्तं **"तद्वति तत्प्रकारकोऽनुभवो यथार्थः"।** अयं घट इति ज्ञानम्। सैव प्रमा। अपरञ्च विशेषजिज्ञासानिराकरणाय शिष्यबुद्धिवैशद्यर्थञ्च द्वादशविधानां प्रमेयाणामुपस्थापनमिति मनसि निधाय प्रमाविषयस्य प्रमेयत्वेऽप्येकं नवीन लक्षणमाचार्यैः वाचस्पतिमिश्रैः कृतम्। तथाहि - **"अपवर्गसाक्षात्कारणतत्त्वधीविषयतावच्छेदकरूपवत्त्वं प्रमेयसामान्य-लक्षणमिति"।**

प्रमेयतत्त्वञ्चात्मशरीरेन्द्रियादिभेदाद् द्वादशविधम्। द्वादशप्रमेयेषु प्रथमप्रमेयस्य आत्मनः विषये सूत्रं विद्यते- **"इच्छाद्वेषप्रयत्नसुखदुः खज्ञानान्यात्मनो लिङ्गम्"**[5]। अर्थात् आत्मा इच्छादिगुणाश्रयत्वेन इच्छाद्यलिङ्गेन च अनमेया भवति। भाष्यकारस्तु- आत्मा सर्वस्य द्रष्टा सर्वस्य भोक्ता सर्वज्ञः सर्वानुभावी। केशवमिश्रेणोक्तम् यत्- आत्मत्वसामान्यवान् आत्मा। ज्ञानाधिकरणमात्मा इति आत्मलक्षणमुक्तमन्नमभट्टेन। कारिकावल्याम्- **"आत्मेन्द्रियाद्यधिष्ठाता करणं हि सकर्तृकम्"**[6] अत्र चार्वकमतम् शरीरात्मवाद, इन्द्रियात्मवाद, मनसात्मवादश्च प्रसिद्धो विद्यते। बौद्धमते क्षणिकविज्ञानात्मवाद प्रसिद्धः। वेदान्तिनां मते नित्यविज्ञानात्मवादः। तदनन्तरं द्वितीयं प्रमेयं शरीरम्- **"चेष्टेन्द्रियार्थाश्रयः शरीरम्"**[7] तस्य भोगायतनं शरीरम्। तस्य भोगायतनमन्त्यावयवि शरीरम्। न्यायदर्शने द्विधा शरीरमिति स्वीकृतम् – योनिजम् अयोनिजं च। शुक्रशोणितयोः संयोगाज्जातं शरीरं योनिजमिति। तद्भिन्नं शरीरमयोनिजायोनिजमिति कथ्यते। तृतीयं प्रमेयमिन्द्रियं- **'घ्राणरसनचक्षुस्त्वक्श्रोत्राणीन्द्रियाणि भूतेभ्यः'**[8]। भोगसाधनानीन्द्रियाणि। शरीरसंयुक्तं ज्ञानकरणमतीन्द्रियम् इन्द्रियम्। शब्देतरोद्भूतविशेषगुणानाश्रयत्वे सति ज्ञानकारणमनः संयोगाश्रयत्व-मिन्द्रियत्वम्, साक्षात्कारमात्रवृत्तिधर्मावच्छिन्नकार्यतानिरूपितकार-णताश्रयव्यापारवदिन्द्रियम् वा। चतुर्थं प्रमेयं भवति अर्थः- **"गन्धरस-रूपस्पर्शशब्दाः पृथिव्यादिगुणाः तदर्थाः"**[9]। भोक्तव्यो इन्द्रियार्थः। 'स्वस्वविषयग्रहणलक्षणानि इन्द्रियाणि' ते चेन्द्रियाणां प्रकाश्यभूता अर्थाः। पञ्चमम् तु- **"बुद्धिरुपलब्धिर्ज्ञानमित्यऽनर्थान्तरम्"**[10]। अर्थप्रकाशो वा बुद्धिः। 'बुद्धयते अनया' इति हि बुद्धिशब्दस्य निर्वचनम्। बुद्धिरियमात्मगुणरूपा भवति। 'सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम्' बुद्धिरेव समेषां जायमानानां व्यवहाराणां हेतुस्वरूपा विद्यते। षष्ठं प्रमेयं मनः **"युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गम्"**[11]। सर्वार्थोपलब्धौ नेन्द्रियाणि प्रभवन्तीति सर्वविषयमन्तःकरणं मनः। अन्तरिन्द्रियं मनः। न्याये मनः अणुरूपं भवति। सप्तमं प्रमेयं प्रवृत्तिः **"प्रवृत्तिः वाग्बुद्धिशरीराम्भः"**[12]। शरीरेन्द्रियार्थबुद्धिसुखवेदनानां निवृत्तिकारणं प्रवृत्तिः। प्रवृत्तिः धर्माधर्ममयी यागादिक्रिया, तस्य जगद्व्यवहारसाधकत्वात्। अष्टमं प्रमेयं दोषो भवति **"प्रवर्त्तनालक्षणा दोषाः"**[13]। प्रवृत्तिरेव दोषाः। रागद्वेषमोहाः। नवमं प्रमेयं प्रेत्यभावः **"पुनरुत्पत्ति प्रेत्यभावः"**[14]। 'नाऽस्येदं शरीरमपूर्वमनुत्तरं च, पूर्वशरीराणायादिर्नास्ति उत्तरेषामपवर्गोऽन्तः' इति प्रेत्यभावः। स चात्मनः पूर्वदेहनिवृत्तिः, अपूर्वदेहसंघातलाभः। दशमं प्रमेयं फलं **"प्रवृत्तिदोषजनितोऽर्थः फलम्"**[15]। ससाधनसुखदुःखोपभोगः फलम्। फलं पुनर्भोगः सुखदुःखान्यतरसाक्षात्कारः। एकादशं प्रमेयं दुःखं **"बाधनालक्षणं दुःखम्"**[16]। पीडा दुःखं स च एकविंशतिप्रभेदभिन्नस्य दुःखस्य आत्यन्तिकी निवृत्तिः। द्वादशं चरमं प्रमेयं भवति अपवर्गः **'तदत्यन्तविमोक्षोऽपवर्गः'**[17]। जन्ममरणप्रबन्धोच्छेदः सर्वदुः खप्रहाण-मपवर्गः।

तत्र शरीरादिदुःखान्तं दशविधं प्रमेयं हेयम्। अपवर्ग उपादेयः। आत्मा तु सुखदुःखादिभोक्तृत्वस्वभावो हेयः। भोगादिव्यवहार-पराङ्मुखस्त्वात्मा उपादेयः। मोक्षमाणैः प्रमाणेन प्रमातव्यं हेयोपादेयभेदभिन्नमिदमेव द्वादशविधं प्रमेयम्। एवञ्च यद्यपि सूत्रकारेण द्वादशविधं प्रमेयमुक्तं तथापि तस्य चतुर्धा भाष्यमानस्यैव निःश्रेयसनिमित्तत्वमिति ज्ञापयितुं संग्रहेण चातुर्विध्यं वक्तुं शक्यते। तथाहि- **"तच्चतुर्विधं हेयं, तस्य निर्वर्तकं, हानमात्यन्तिकं तस्योपाय इति"** न्यायसारः, आ. प्रकरणम्। **हेयं-** दुःखमनागतम् (अवश्यं प्रयत्नेन परित्याज्यम्) यथा- शरीरं, षडिन्द्रियाणि, षड् विषयाः, षड् बुद्धयः,

सुखं, दुःखं चेति। **तस्य निवर्त्तकं-** असाधारणकारणमविद्यातृष्णे धर्माधर्माविति च। सम्यग् अध्यात्मविद्भिः प्रदर्शितेऽर्थे विपरीतज्ञानं अविद्या, पुनर्भवप्रार्थना तृष्णा, सुखदुः खयोरसाधारणहेतु धर्माधर्माविति। **हानम्-** हानं दुःखस्योच्छेदः। **आत्यन्तिकमिति-** न कदाचित् कथञ्चिद् दुःखसम्बन्ध इत्यर्थः। **तस्योपायः-** तत्त्वज्ञानमात्मविषयम्। तथा चोक्तं-

**आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यश्च**[18] इति। तथाहि -

**श्रोतव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिः।**
**मत्वा च सततं ध्येय एते दर्शनहेतवः॥**

अनेन ज्ञायते यत् आत्मतत्त्वसाक्षात्कारेणैव मोक्षस्य प्राप्तिः भवत्येव। तदपि तादृशतत्त्वज्ञानेन मिथ्याज्ञानादीनामपाये सति दुःखानामात्यन्तिकनिवृत्तौ अपवर्गो भवतीति न्यायसिद्धान्तः।

**संकेताक्षरसूची**

1.का.व. -कारिकावली

2.न्या.सि.मु. -न्यायसिद्धान्तमुक्तावली

3.न्या.सू. - न्यायसूत्रम्

4.सां.का. – सांख्यकारिका

**सन्दर्भग्रन्थसूची**


१. अन्नंभट्टः। **तर्कसंग्रहः** (न्यायबोधिनी-पदकृत्यसहितः)। बोम्बे : श्रीवेङ्कटेश्वर प्रेस, १८९२।

२. उदयनाचार्यः। **कारिकावली**। सम्पा. सि. शंकररामशास्त्री। मद्रास, 1923।

३. उदयनाचार्यः। **कारिकावली**। सम्पा, विन्ध्येश्वरीप्रसादद्विवेदी। चौखम्बा संस्कृत सीरीज। वाराणसी,1897।

४. मिश्रः, द्वितीयवाचस्पति। **न्यायतत्त्वालोकः**। सम्पा। डा.किशोरनाथ झा। प्रयागः गङ्गानाथझाकेन्द्रियसंस्कृतविद्यापीठम्,१९९२।

५. मिश्रः, केशवः। **तर्कभाषा**। सम्पा. वदरीनाथशुक्लः। दिल्ली: मोतीलाल बनारसीदास, सप्तम् संस्करणम्, २०१७।

६. न्यायपञ्चानन विश्वनाथः। **न्यायसिद्धान्तमुक्तावली**। सम्पा. श्री. कृष्णवल्लभाचार्य। वाराणसी : चौखाम्बासंस्कृतसंस्थानम्। षष्ठ-संस्करणम् , २००३।

७. भट्टाचार्यः, विश्वनाथन्यायपञ्चाननः। **न्यायसिद्धान्तमुक्तावली**। सम्पा. श्री हरिरामशुक्लः न्यायाचार्यः। वाराणसी : चौखम्भा प्रकाशन्। २०१८।

८. भासर्वज्ञः। **न्यायसारः** । व्याखाकारः। वासुदेवसूरी। दिल्ली : संजय प्रकाशन, २००५।

९. वात्स्यायनमुनिः। **न्यायभाष्यम्**। सम्पा. स्वामी द्वारिकादासशास्त्री। वाराणसी : बौद्धभारतीग्रन्थमाला। १९९८।

१०.भट्टः, जयन्तः। **न्यायमञ्जरी** । सम्पा. गौरीनाथशास्त्री। वाराणसी: सं सं वि वि। १९८३।

११.भट्टः,जयन्तः।**न्यायमञ्जरी**। सम्पा. गंगाधरशास्त्रीतैलंगः। वाराणसी : चौखम्बा संस्कृतसीरीज,1895।

१२.महर्षिगौतमः। **न्यायदर्शनम्**। सम्पा. अनन्तलाल ठक्कुरः। दरभंगा: मिथिलाशोधसंस्थानम्, 1967।


**पाद टिप्पणी**

1 न्या.सू. १/१/१

2 न्या. सू, (२.१.१६)

3 न्या. सू. (१.१.३)

4 सां.का. (कारिक ४)

5 न्या.सू.१/१/१०

6 का.व.पृ- ४७

7 न्या.सू. १/१/११

8 न्या.सू. १/१/१२

9 न्या.सू.१/१/१४

10 न्या.सू.१/१/१५

11 न्या.सू. १/१/१६

12 न्या.सू. १/१/१७

13 न्या.सू. १/१/१८

14 न्या.सू. १/१/१९

15 न्या.सू. १/१/२०

16 न्या.सू. १/१/२१

17 न्या.सू. १/१/२२

18 बृ. उप. २ अध्या, ब्राह्म, मन्त्रः ५